# ॥ श्री रामचारित्र्यमञ्जरी ॥

श्रीमान् पूर्वं प्रजातो दशरथनृपते रामनामाथ नीतो
विश्वामित्रेण मन्त्राह्दनुज सहितः ताटकां घातकोऽस्त्रं ।
ब्राह्माद्यं प्राप्य हत्वा निशिचरनिकरं यज्ञपालो विमोच्या-
हल्याशापं च भंक्त्वा शिवधनुरुपयन् जानकीं नः प्रसीदेत् ॥ १ ॥

आयन् रामः सभार्योऽध्वनि निजसहजैर्भार्गवेष्वासरोपा-
त्तद्रं हत्वा सुरारिं पुरग उत नुतस्तापसैर्भूपपृष्टैः ।
कल्याणानन्तधर्मोगुणलवरहितः प्राणिनामन्तरात्मे
त्याद्युक्तश्चाभिषेके पुरजनमहितो मह्यतां मे वचोभिः ॥ २ ॥

कैकेयीप्रीतिहेतोस्ससहजनृपजो वल्कली यानरण्यं
गङ्गातारी गुहार्च्यः कृतरुचिरजटो गीष्पतेः पुत्रमान्यः ।
तीर्थ्वा कृष्णां प्रयातोऽवतु निजममलं चित्रकूटं प्रपन्नं
स्वाम्बाभिर्भ्रातरं तं श्रुतजनकगतिस्सान्त्वयन्व्युप्ततीर्थः ॥ ३ ॥

दत्त्वास्मै पादुके स्वे क्षितिभरणकृतौ प्रेश्य तं काकनेत्रं
व्यस्याराध्योऽत्रिनाम्ना वनमथ समितो दण्डकं तापसेष्टं ।
कुर्वन् हत्वा विराधं खलकुलदमनं याचितस्तापसाग्रैः
तेषां दत्वाऽभयं स्वानसिधनुरिषुधीन्यानगस्त्यात् पायात् ॥ ४ ॥

आसीनः पञ्चवट्यामकुरुत विकृतां राक्षसीं यो द्विसप्त-
क्रव्यादानप्यनेकानथ खरमवधीद्दूषणं च त्रिशीर्षं ।

मारीचं मार्गरूपं दशवदनहृतामाकृतिं भूमिजायाः
अन्विष्यन्नार्तगृध्रं स्वगतिमथ नयन्मामवेत् घ्नन् कबन्धं ॥ ५ ॥

पम्पातीरं च गच्चन्निह कृतवसतिर्भक्तितुष्टः श्यबर्यै
दत्वा मुक्तिं प्रकुर्वन् हनुमत उदितं प्राप्तसुग्रीवसख्यं ।
सप्तच्चित्वाथ तालान्विधिवरबलिनो वालिभित्सूर्यसूनुं
कुर्वाणो राज्यपालं समवतु निवसन्माल्यवत्कन्धरेसौ ॥ ६ ॥

नीत्वा मासान् कपीशानिह दशहरितः प्रेष्य सीतां विचित्या-
ऽऽयात श्रीमद्धनूमद्गिरमथ समनुश्रुत्य गच्चन् कपीन्द्रैः ।
सुग्रीवाद्यैरसन्ख्यैर्दशमुखसहजं मानयन्नब्धिवाचा
दैत्यघ्नस्सेतुकारी रिपुपुररुदवेद्वानरैर्वैरिघाती ॥ ७ ॥

भग्नं कृत्वा दशास्यं गुरुतरवपुषं कुम्भकर्णं निगृह्य
प्रध्वस्ताशेषनागं पदकमलनतं तार्क्ष्यमानन्द्य रामः ।
सर्वानुज्जीवयन्तं गिरिधरमनघश्चान्जनेयं कपीन् स्वान्
विज्ञानास्त्रेण रक्षन् समवतु दमयन् लक्ष्मणाच्चक्रशत्रुं ॥ ८ ॥

क्रव्यादान् घ्नन्नसंख्यानपि दशवदनं ब्रह्मपूर्वैस्सुरेशैः
पुष्पैराकीर्यमाणो हुतवहविमलामाप्य सीतां विधाय ।
रक्षोनाथं स्वभक्तं स्वपुरमथगतः पुष्पकस्थस्समस्तैः
साम्राज्ये चाभिषिक्तो निजजनमखिलं मानयन्मे गतिः स्यात् ॥ ९ ॥

रक्षन् क्षोणीं समृद्धां नुत उत मुनिभिर्मानयन्वायुसूनुं

प्रेष्यादित्यात्मजादीन् व्यतनुत भरतं यौवराज्येनुमान्य ।
कार्ये सौमित्रिमार्तश्वगदितकृदरिघ्नोऽथ शत्रुघ्नतो यो
हत्वाऽसौ दुष्टशूद्रं द्विजसुतगुबवेत्कुम्भजान्मालभारी ॥ १० ॥

यज्ञं तन्वन्स्त्रिकोटीन् व्यतुदत भरताद्योऽसुरानीशवाक्या-
द्यास्यन् धामात्रिपुत्रं भुजिमथ स नयन्नात्मसूनू स्वराज्ये ।
कृत्वा श्रीह्रीहनूमद्धृतविमलचलच्चामरच्छत्रशोभी
ब्रह्मादैः स्तूयमानो निजपुरविलसत्पादपद्मोऽवतान्मां ॥ ११ ॥

इति श्रीरामचारित्रमञ्जरी लेशतः कृता ।
राघवेन्द्रेण यतिना भूयाद्रामप्रसाददा ॥ १२ ॥

॥ इति श्रीराघवेन्द्रतीर्थकृत श्रीरामचारित्रमञ्जरी ॥